# Shri Skandastava

# શ્રીસ્કન્દસ્તવમ્

## Document Information

```
Text title : skandastavam by vAmadeva
File name : skandastavamvAmadeva.itx
Category : subrahmanya
Location : doc_subrahmanya
Proofread by : NA
Description/comments : shivapurANam 6.11 verses 22-35
Source : shivapurANam, saMhitA 6 (kailAsasaMhitA), adhyAyaH 11
Latest update : August 28, 2021
Send corrections to : Sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# શ્રીસ્કન્દસ્તવમ્

(શિવમહાપુરાણે)

વામદેવ ઉવાચ ।

ૐ નમઃ પ્રણવાર્થાય પ્રણવાર્થવિધાયિને ।
પ્રણવાક્ષરબીજાય પ્રણવાય નમોનમઃ ॥ ૨૨॥ ૧

વેદાન્તાર્થસ્વરૂપાય વેદાન્તાર્થવિધાયિને ।
વેદાન્તાર્થવિદે નિત્યં વિદિતાય નમોનમઃ ॥ ૨૩॥ ૨

નમો ગુહાય ભૂતાનાં ગુહાસુ નિહિતાય ચ ।
ગુહ્યાય ગુહ્યરૂપાય ગુહ્યાગમવિદે નમઃ ॥ ૨૪॥ ૩

અણોરણીયસે તુભ્યં મહતોઽપિ મહીયસે ।
નમઃ પરાવરજ્ઞાય પરમાત્મસ્વરૂપિણે ॥ ૨૫॥ ૪

સ્કન્દાય સ્કન્દરૂપાય મિહિરારુણેતેજસે ।
નમો મન્દારમાલોદ્યન્મુકુટાદિભૃતે સદા ॥ ૨૬॥ ૫

શિવશિષ્યાય પુત્રાય શિવસ્ય શિવદાયિને ।
શિવપ્રિયાય શિવયોરાનન્દનિધયે નમ ॥ ૨૭॥ ૬

ગાઙ્ગેયાય નમસ્તુભ્યં કાર્તિકેયાય ધીમતે ।
ઉમાપુત્રાય મહતે શરકાનનશાયિને ॥ ૨૮॥ ૭

ષડક્ષરશરીરાય ષડ્વિધાર્થવિધાયિને ।
ષડધ્વાતીતરૂપાય ષણ્મુખાય નમોનમઃ ॥ ૨૯॥ ૮

દ્વાદશાયતનેત્રાય દ્વાદશોદ્યતબાહવે ।
દ્વાદશાયુધધારાય દ્વાદશાત્મન્નમોઽસ્તુ તે ॥ ૩૦॥ ૯

ચતુર્ભુજાય શાન્તાય શક્તિકુક્કુટધારિણે ।
વરદાય વિહસ્તાય નમોઽસુરવિદારિણે ॥ ૩૧॥ ૧૦

ગજાવલ્લીકુચાલિપ્તકુઙ્કુમાઙ્કિતવક્ષસે ।
નમો ગજાનનાનન્દમહિમાનન્દિતાત્મને ॥ ૩૨॥ ૧૧

બ્રહ્માદિદેવમુનિકિન્નરગીયમાનગાથાવિશેષશુચિચિન્તિતકીર્તિધામ્ને ।
વૃન્દારકામલકિરીટવિભૂષણસ્રક્પૂજ્યાભિરામપદપઙ્કજ તે નમોઽસ્તુ ॥ ૩૩॥ ૧૨

ઇતિ સ્કન્દસ્તવન્દિવ્યં વામદેવેન ભાષિતમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ સ યાતિ પરમાં ગતિમ્ ॥ ૩૪॥ ૧૩

મહાપ્રજ્ઞાકરં હ્યેતચ્છિવભક્તિવિવર્ધનમ્ ।
આયુરારોગ્યધનકૃત્સર્વકામપ્રદં સદા ॥ ૩૫॥ ૧૪

ઇતિ સ્તુત્વા વામદેવો દેવં સેનાપતિં પ્રભુમ્ ।
પ્રદક્ષિણાત્રયં કૃત્વા પ્રણમ્ય ભુવિ દણ્ડવત્ ॥ ૩૬॥

સાષ્ટાઙ્ગં ચ પુનઃ કૃત્વા પ્રદક્ષિણનમસ્કૃતમ્ ।
અભવત્પાર્શ્વતસ્તસ્ય વિનયાવનતો દ્વિજાઃ ॥ ૩૭॥

વામદેવકૃતં સ્તોત્રમ્પરમાર્થવિજૃમ્ભિતમ્ ।
શ્રુત્વાભવત્પ્રસન્નો હિ મહેશ્વરસુતઃ પ્રભુઃ ॥ ૩૮॥

તમુવાચ મહાસેનઃ પ્રીતોઽસ્મિ તવ પૂજયા ।
ભક્ત્યા સ્તુત્યા ચ ભદ્રન્તે કિમદ્યકરવાણ્યહમ્ ॥ ૩૯॥

મુને ત્વં યોગિનાંમુખ્યઃ પરિપૂર્ણશ્ચ નિસ્પૃહઃ ।
ભવાદૃશાં હિ લોકેસ્મિપ્રાર્થનીયં ન વિદ્યતે ॥ ૪૦॥

તથાપિ ધર્મરક્ષાર્યૈ લોકાનુગ્રહકાઙ્ક્ષયા ।
ત્વાદૃશા સાધવસ્સન્તો વિચરન્તિ મહીતલે ॥ ૪૧॥

શ્રોતવ્યમસ્તિ ચેદ્બ્રહ્મન્વક્તુમર્હસિ સામ્પ્રતમ્ ।
તદિદાનીમહં વક્ષ્યે લોકાનુગ્રહહે તવે ॥ ૪૨॥

ઇતિ સ્કન્દવચઃ શ્રુત્વા વામદેવો મહામુનિઃ ।
પ્રશ્રયાવનતઃ પ્રાહ મેઘગમ્ભીરયા ગિરા ॥ ૪૩॥

વામદેવ ઉવાચ ।
ભગવન્પરમેશસ્ત્વં પરાપરવિભૂતિદઃ ।
સર્વજ્ઞસર્વકર્તા ચ સર્વશક્તિધરઃ પ્રભુઃ ॥ ૪૪॥

જીવા વયં તુ તે વક્તું સન્નિધૌ પરમેશિતુઃ ।

તથાપ્યનુગ્રહો યન્તે યત્ત્વં વદસિ માં પ્રતિ ॥ ૪૫॥

કૃતાર્થોઽહં મહાપ્રાજ્ઞ વિજ્ઞાનકણમાત્રતઃ ।
પ્રેરિતઃ પરિપૃચ્છામિ ક્ષન્તવ્યોતિક્રમો મમ ॥ ૪૬॥

પ્રણવો હિ પરઃ સાક્ષાત્પરમેશ્વરવાચકઃ ।
વાચ્યઃ પશુપતિર્દેવઃ પશૂનાં પાશમોચકઃ ॥ ૪૭॥

વાચકેન સમાહૂતઃ પશૂન્મોચયતે ક્ષણાત્ ।
તસ્માદ્વાચકતાસિદ્ધિઃ પ્રણવેન શિવમ્પ્રતિ ॥ ૪૮॥

ૐ મિતીદં સર્વમિતિ શ્રુતિરાહ સનાતની ।
ઓમિતિ બ્રહ્મ સર્વં હિ બ્રહ્મેતિ ચ સમબ્રવીત્ ॥ ૪૯॥

દેવસેનાપતે તુભ્યન્દેવાનામ્પતયે નમઃ ।
નમો યતીનામ્પતયે પરિપૂર્ણાય તે નમઃ ॥ ૫૦॥

એવં સ્થિતે જગત્યસ્મિઞ્છિવાદન્યન્ન વિદ્યતે ।
સર્વરૂપધરઃ સ્વામી શિવો વ્યાપી મહેશ્વરઃ ॥ ૫૧॥

સમષ્ટિવ્યષ્ટિભાવેન પ્રણવાર્થઃ શ્રુતો મયા ।
ન જાતુચિન્મહાસેન સમ્પ્રાપ્તસ્ત્વાદૃશો ગુરુઃ ॥ ૫૨॥

અતઃ કૃત્વાનુકમ્પાં વૈ તમર્થં વક્તુમર્હસિ ।
ઉપદેશવિધાનેન સદાચારક્રમેણ ચ ॥ ૫૩॥

સ્વામ્યેકઃ સર્બ્વજન્તૂનાં પાશચ્છેદકરો ગુરુઃ ।
અતસ્ત્વત્કૃપયા સોઽર્થઃ શ્રોતવ્યો હિ મયા ગુરો ॥ ૫૪॥

ઇતિ સ મુનિના પૃષ્ટઃ સ્કન્દઃ પ્રણમ્ય સદાશિવં
    પ્રણવવપુષં સાષ્ટત્રિંશત્કલાવરલક્ષિતમ્ ।
સહિતમુનયા શશ્વત્પાર્શ્વે મુનિપ્રવરાન્વિતં
    ગદિતુમુપચક્રામ શ્રેયઃ શ્રુતિષ્વપિ ગોપિતમ્ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં
વામદેવબ્રહ્મવર્ણનંનામૈકાદશોઽધ્યાયાન્તર્ગતમ્ સ્કન્દસ્તવં સમ્પૂર્ણમ્ ॥

shivapurANam, saMhitA 6 (kailAsasaMhitA), adhyAyaH 11
Although the initial stotra ends at verse 35, verse 44 onwards
also constitute relevant praise of Skanda, so is included

for reference.

NA

*Shri Skandastava*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*